अध्याय :- ३७ Chapter-37

श्री नारद उवाच ।।
बर्बरीतिर्थ[१] माहात्म्यमथो वक्ष्यामि ते(र्जुन ।।
यथा बर्बरिका जाता शतशृंग नृपात्मजा ।। १

कुमारिकेति विख्याता तस्या नाम्ना प्रकथ्यते ।।
इदं कौमारिकाखंडे[२] चतुर्वर्ग फलप्रदम् ।। २

यया कृता पृथिव्यां च नानाग्रामादि कल्पना ।।
इदं भरतखंडं च यया सम्यकप्रकल्पितम् ।। ३

धनंजय उवाच ।।
महदेतन्ममाश्चर्यं श्रोतव्यं परमं मुने ।।
कुमारीचरितं सर्वं ब्रूहि मह्यं सविस्तरम् ।। ४

कथं विश्वमिदं जातं कर्मजाति प्रकल्पितम् ।।
कथं वा भारतं खंडं शुश्रुषोर्यं सदा मम् ।। ५

नारद उवाच ।।[३]
अव्यक्तो(स्मिन्निरालोके प्रधानपुरुषा वुभौ ।।
अजौ समागतावेकौ केवलं शृणुमो वयम् ।। ६

ततः स्वभावकालाभ्यां स्वरूपाभ्यां समीरितम्[४]।।
ईक्षणेनैव प्रकृतेर्महत्तत्वमजायत ।। ७

---

१ बं. बर्करीतीर्थ　　२ ब. कुमारिका खंडं
३ ब. श्री नारद उ० ।।　　४ ब. समीरितः

महत्तत्वाद्विकुर्वाणा दहंतत्वं व्यजायत ।।
त्रिधा तन्मुनिभिः प्रोक्तं सत्वाराजस तामसम् ।। ८

तामसात्पंच जातानि तन्मात्राणि विदुर्बुधाः ।।
तन्मात्रेभ्यश्च भूतानि विशेषाः पंच तद्भवाः ।। ९

सात्विकाच्चाप्यहंकाराद्धि कर्मेंद्रियाणि च ।।
एकादशं मनश्चैव राजसं च द्वयोर्विदुः ।। १०

चतुर्विंशति तत्वानि जातानीति पुरा विदुः ।।
सदाशिवेन वै पुंसां तानि दृष्टानि भारत ।। ११

बुद्बुदा[1]कारतां जग्मुरंडं जातं ततः शुभम् ।।
शतकोटिप्रमाणं च ब्रह्मांडमिदमुच्यते ।। १२

आत्मास्य कथितो ब्रह्मा व्यभजत्स त्रिधा त्विदम् ।।
ऊर्ध्वं तत्र स्थिता देवा मध्ये चैव मानवाः ।। १३

नागा दैत्याश्च पाताले त्रिधेतत्परिकल्पितम् ।।
एकैकं सप्तधाभूय ततस्तेन प्रकल्पितम् ।। १४

---

१ ब. बुद्बुदा

पातालानि च द्विपानि स्वर्लोकाः सप्तसप्त च ।।
सप्त द्वीपानि वक्ष्यामि श्रृणु तेषां प्रकल्पनाम् ।। १५

लक्षयोजनविस्तारं जंबुद्वीपं प्रकीर्त्यति[१] ।।
सूर्य बिंब समाकारं तावत्क्षाराणविावृतम् ।। १६

शाकद्वीपं द्विगुणतो जंबुद्वीपात्ततः परम् ।।
तावता क्षीरतोयेन समुद्रेण परीवृतम् ।। १७

सुरातोयेन दैत्यानां मोहकार्यणविन हि ।।
पुष्करं तु ततो द्वीपं द्विगुणं तावता वृतम् ।। १८

कुशद्वीपं द्विगुणतस्ततस्तत्परतः स्मृतम् ।।
दधितोयेन परितस्तावदर्णव संवृतम् ।। १९

ततः परं क्रौंचसंज्ञं द्विगुणं हि धृताब्धिना ।।
ततः शाल्मलिद्वीपं च द्विगुणं तावतैव च ।। २०

इक्षुसारस्वरूपेण समुद्रेण परीवृतम् ।।
गोमेदं तस्य परितो द्विगुणं तावतावृतम् ।। २१

---

१ ब. त

स्वादुतोयेन रम्येण समुद्रेण समंततः ।।
एवं कोटिद्वयं पार्थ लक्षपंचाशतत्रयम् ।। २२

पंचाशच्च सहस्त्राणि सप्तद्वीपाः[1]ससागराः ।।
दशोत्तराणि पंचैव अंगुलानां शतानि च ।। २३

अपां[2] वृद्धिक्षयो दृष्टः पक्षयोः शुक्लकृष्णयोः ।।
ततो हेममयी भूमिर्दशकोटयः कुरूद्वह ।। २४

देवानां क्रीडनस्थानं लोकालोकस्ततः परम् ।।
पर्वतो वलयाकारो योजनायुत विस्तृतः ।। २५

अस्य बाह्ये तमो घोरं दुष्प्रेक्ष्यं जीवर्जितम् ।।
पंच त्रिंशत्स्मृताः कोटयोलक्षाण्यैकोन विंशतिः ।। २६

चत्वारिंशत्सहस्त्राणि योजनानां च फाल्गुन ।।
सप्तसागरमानस्तु गर्भादिस्तदनं तरम् ।। २७

कोटि योजन विस्तारः कटाहः संव्यवस्थितः ।।
ब्रह्मणोऽर्ड कटाहेन संयुक्तं मेरुमध्यतः ।। २८

---

१ ब. पा
२ ब. अपा

पंचाशत्कोटयो ज्ञेया दशदिक्षु [1]सर्मंततः ।।
जंबुद्वीपस्य मध्ये तु मेरुनामास्ति पर्वतः ।। २९

स लक्षयोजनो ज्ञेयो ह्यधश्चोर्ध्वं प्रमाणतः ।।
षोडशैव सहस्त्राणि योजनानामधः स्थितः ।। ३०

उच्छ्रयश्चतुरा शीतिर्द्वात्रिंशन्मूर्ध्नि विस्तृतः ।।
त्रिभिः शृंगैः समायुक्तः शरावाकृति मस्तकः ।। ३१

मध्यशृंगे ब्रह्मवास[2] ऐशान्यां[3] त्र्यंबकस्य च ।।
नैर्ऋत्ये वासुदेवस्य हेमशृंगं च ब्रह्मणः ।। ३२

रत्नजं शंकरस्यापि राजतं केशवस्य च ।।
मेरुदिक्षु चतसृषु विष्कंभा गिरयः स्मृताः ।। ३३

पूर्वेण मंदरो नाम दक्षिणे गंधमादनः[4] ।।
विपुलः पश्चिमो ज्ञेयः सुपार्श्वस्तु तथोत्तरे ।। ३४

कंदबो मंदरे ज्ञेयो जंबुर्वै गंधमादने ।।
अश्वत्थो विपुले चैव सुपार्श्वे च वटोमतः ।। ३५

---

१ ब. प्रती "सर्म" नास्ति ।
२ ब. ....वासः
३ ब. ईशान्यां
४ ब. न

एकादश शतायामाश्चत्वारो गिरिकेतवः ।।
एतेषां संति चत्वारि वनानि जयमूर्धसु ।। ३६

पूर्वं चैत्ररथं नाम दक्षिणे गंधमादनम् ।।
वैभ्राजं पश्चिमे ज्ञेयमुदक्चित्ररथं वनम् ।। ३७

सरांसि चापि चत्वारि चतुर्दिक्षु निबोध मे ।।
प्राच्येऽरुणोदसंज्ञं तु मानसं दक्षिणे सरः ।। ३८

प्रत्यक्शीतोदकंनाम उत्तरे च महाह्रदः ।।
विष्कंभगिरयो ह्येत उच्छ्रिताः पंचविंशतिः ।। ३९

योजनानां सहस्राणि सहस्रं पिंडतः स्मृतम् ।।
अन्ये च संति बहुशस्तत्र वै केसराचलाः ।। ४०

मेरोर्दक्षिणतश्चैव त्रयो मर्याद पर्वताः[१] ।।
निषधो हेमकूटश्च हिमवानिति ते त्रयः ।। ४१

लक्षयोजनदीर्घाश्च विस्तीर्णा द्विसहस्रकम् ।।
त्रयश्चोत्तरतो मेरोर्नीलः श्वेतोऽथ शृंगवान् ।। ४२

---

१ ब. पर्वतः

माल्यावान्पूर्वतो मेरोर्गंधाख्यः पश्चिमे तथा ।।
इत्येते गिरयेः प्रोक्ता जंबुद्वीपे समंततः ।। ४३

गंधमादन संस्थाया महागज प्रमाणतः ।।
फलानि जंबुवास्तन्नाम्ना जंबुद्वीपमिति स्मृतम् ।। ४४

आसीत्स्वार्य[१] भुवोनाम मनुराद्यः प्रजापतिः ।।
आसीत्स्त्री शतरूपा तामुद्ववोढ प्रजापतिः ।।
प्रियव्रतोत्तानपादो तस्याः स्तां तनयावुभौ ।। ४५

ध्रुवस्त्वौत्तानपादस्य पुत्रः परमधार्मिकः ।।
भक्त्या स विष्णुमाराध्य स्थानं चैवाक्षयं गतः ।। ४६

प्रियव्रतस्य राजर्षेरुत्पन्ना दश सूनवः ।।
त्रयः[२] प्रव्रजितास्तत्र परं ब्रह्म समाश्रिताः ।। ४७

सप्त सप्तसु द्वीपेषु तेन पुत्राः प्रतिष्ठिताः ।।
जंबुद्वीपाधिपो ज्येष्ठ आग्नीध्र[३] इति विश्रुतः ।। ४८

तस्यासन्नव सुताः पार्थ नववर्षेश्वराः स्मृताः ।।
तेषां[४] नाम्ना च ते वर्षास्तिष्ठंत्यद्यापि चांकिताः ।। ४९

---

१ ब. असीस्वार्य

२ ब. त्रय

३ ब. अग्निध्र

४ ब. एतत्स्थाने "सस्त" पठ्यते ।

योजनानां सहस्त्राणि नव प्रत्येकशः स्मृताः ।।
मेरोश्चतुर्दशं खंडं गंधमाल्यवतोर्द्वयोः ।। ५०

अंतरे हेमभूमिष्ठमिलावृत मिहोच्यते ।।
माल्यवत्सागरांतस्य भद्राश्वमिति प्रोच्यते ।। ५१

गंधवत्सागरांतस्य केतुमालमिति स्मृतम् ।। ५२

श्रृंगवज्जलधेरंतः कुरुखंडमिति स्मृतम् ।।
श्रृंगच्छ्वेतमध्ये च खण्डं प्रोक्तं हिरण्मयम् ।। ५३

सुनीलश्वेतयोर्मध्ये खंडमाहुश्च रम्यकम् ।।
निषधो हेमकूटश्च हरिखंडं तदंतरा ।। ५४

हिमवद्धिम कूटांतः खण्डं किंपुरुषं स्मृतम् ।।
हिमाद्रि जलधेरन्तर्नाभि खण्डमिति स्मृतम् ।। ५५

नाभिखण्डं च कुरवो द्वे वर्षे धनुषाकृती ।।
हिमवांश्च गिरिश्रृंगी ज्यास्थाने परिकीर्तितौ[१] ।। ५६

---

१ ब॰ ते

नाभेः[१] पुत्रश्च ऋषभ ऋषभाद्भरतोऽभवत् ।।
तस्य नाम्ना त्विदं वर्षं भारतं चेति कीर्त्यते ।। ५७

अत्र धर्मार्थकामानां मोक्षस्य च उपार्जनम् ।।
अन्यत्र भोगभूमिश्च सर्वत्र कुरुनंदन ।। ५८

शाकद्वीपे च शाकोऽस्ति योजनानां सहस्त्रकः ।।
तस्य नाम्ना च तद्वर्षं शाकद्वीपमिति स्मृतम् ।। ५९

तस्य च प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथि रिति ।। ६०

तस्य पुरोजव मनोजव वेपमान धूम्रानीकचित्ररेफ बहुरुप ।।
विश्ववचारसंज्ञानि पुत्रनामानि सप्त वर्षाणि ।। ६१

शाकद्वीपे च वर्षं ऋतव्रतसत्यव्रतानुव्रतनामानी ।।
वाटयात्मकं भगवंतं जपैति[२] ।। ६२

अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ।।
अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे जगत् ।। ६३

---

१ ब. नाभि

२ ब. जपंती

इति जपश्च: ।।[१]

कुशद्वीपे कुशस्तंबो योजनानां सहस्त्रकः ।।

तच्चिह्नचिह्नतं तस्मात्कुशद्वीपं ततः स्मृतम् ।। ६४

तद्वीपपतिश्च प्रैयव्रतो हिरण्यरोमा तत्पुत्रवसु वसुदानदढक विनाभि -

- गुप्त सत्यव्रतवामदेव नामांकितानि सप्त वर्षाणि ।।

वर्णाश्च कुलिशकोविदाभियुक्त जातवेदसं भगवंतं स्तुवंति ।। ६५

परस्य ब्रह्मणः साक्षाज्जातवेदासि हव्यवाड् ।।

देवानां पुरुषांगानां यज्ञेन पुरुषं[२] यजः[३] ।। ६६

इति [४]स्तुतिः ।।

क्रौंचद्वीपे क्रौंचनामा पर्वतो योजनायुतः ।।

योऽसौ गुहेन निर्भिन्नस्तच्चिह्नं क्रौंचद्वीपकम् ।। ६७

तत्र च प्रैयव्रतो धृतपृष्टिनामा तत्पुत्राममधुरुह ।।

मेघपृष्ठस्वधामा ऋताश्चलोहितार्णव वनस्पति इति सप्त पुत्रनामां -

- कितानि सप्त वर्षाणि ।। ६८

वर्णाश्च गुरुऋषभद्र विणदेवक संज्ञाः ।। ६९

आपोमयं भगवंतं स्तुवंति ।। ७०

---

१ ब. प्रतौ इत्ययं पाठः नास्ति ।

२ ब. पुरु

३ ब. यज

४ ब. श्रुतिः

इति जपः ।।

शाल्मलेर्नाम वृक्षस्य तत्रवासः सहस्त्रं योजनानां ।।
तच्चिह्नं शाल्मलिद्वीप मुच्यते ।। ७१

तस्याधिपतिः प्रैयव्रतो यज्ञबाहुस्तत्पुत्र सुरोचन ।। ७२

सौमनस्य रमणक देवबर्हिपारि भद्राप्यायनाभिज्ञान नामानि
सप्तवर्षाणि ।। ७३

वर्णाश्च श्रुतधरवीर्यवसुंधर इषांधरसंज्ञा भगवंतं सोमं यजंति ।। ७४

स्वयोनिः पितृदेवेभ्यो विभजंछुक्लकृष्णयोः ।।
अथः प्रजानां सर्वासां राजा नः सोमोस्तु ।। ७५

इति जपः ।।[१]
गोमेद नाम प्लक्षोस्ति सुरम्योयस्यच्छायया ।।
मेदोवृद्धिं गतं लौल्याद्गोमेदं द्वीपमुच्यते ।। ७६

तत्र प्रैयव्रत इध्मजिह्वः पतिस्तत्पुत्र शिवसुरम्य ।।
सुभद्र शांत्य शप्तामृता भयनामांकितानि सप्त वर्षाणि ।। ७७

---

१ ब. प्रतौ नास्ति ।

वर्णाश्व हंसपतंगोध्वचिनसत्यांगसंज्ञाश्ववारो भगवंतं सूर्यं यजंति ।। ७८

प्रश्नस्य विष्णुरूपं यत्तत्रोत्थस्य ब्रह्मणो मृतस्यच।।
मृत्योश्व सूर्यमात्मानं धीमहि ।। ७९

इति जपः ।।[१]
स्वर्णपत्राणि नियुतं योजनानां सहस्त्रकम् ।।
पुष्करं ज्वलद्याभाति तच्चिह्नं द्वीप पुष्करम् ।। ८०

तस्याधिपतिः[२] प्रैयव्रतो वीतहोत्रनामा तत्पुत्री रमणक धातकौ ।। ८१

तानाम्नचिह्नितं खंडद्वयम् ।। ८२

तयोरंतराले मानसाचलो नाम वलयाकारः पर्वतो ।।
यस्मिन्भ्रमति भगवानन्भास्कर इति ।। ८३

तत्र वर्णाश्व न संति केवलं समानास्ते ब्रह्म ध्यायंति ।। ८४

---

१ ब. प्रतौ नास्ति ।
२ ब. पति

यद्यत्कर्ममयं लिंगं ब्रह्मलिंगं जनोर्चयन् ।।
भेदेनैकांतमद्वैतं तस्मै भगवते[1] नमः ।। ८५

इति [2]जपः ।।
नेष्टु क्रोधो न मास्तर्यं पुण्यपापार्जनैन च ।।
अयुतं द्विगुणं चापि क्रमादायुः प्रकीर्तितम् ।। ८६

जपंतः कामिनियुक्ता विहरंत्यमरा इव ।।
अथ ते संप्रवक्ष्यामि ऊर्ध्वलोकस्य संस्थितिम् ।। ८७

*३ इति श्री स्कांदे......कुमारिकाख्याने भूसंस्थिति वर्णनं नाम सप्तत्रिंशोऽध्यायः ।।

---

१ ब. भगवता
२ ब. जय जयः ।।
*३ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे भूसंस्थिति षट्त्रिंशोऽध्यायः।।
Actually it is 37th chapter.